# Patha

Patha alleviates atisara, sula, kapha, pitta and jvara. **(Sdn)**

पाठाऽम्बष्ठाऽम्बष्ठिका स्यात् प्राचीना पापचेलिका ।
पाठिका स्थापनी चैव श्रेयसी वृद्धिकर्णिका ॥
एकाष्ठीला कुचैली च दीपनी वरतिक्तका ।
तिक्तपुष्पा बृहत्तिक्ता दीपनी त्रिशिरा वृकी ॥
मालवी च वरा देवी वृत्तपर्णी द्विदृङ्मिता । **(Rjn)**

Patha, ambashtha, ambashthika, pracina, papacelika, pathika, sthapani, sreyasi, vrddhakarnika, ekasthila, kucaili, dipani, varatiktaka, tiktapuspa, brhattikta, dipani, trisira, vrki, malavi, vara, devi, vrttaparni are the synonyms of patha.

पाठा स्थैल्या स्थापनी तु वृद्धा चाश्मसुता वरा ।
अम्बष्ठाऽम्बष्ठका यूथा प्राचीनाऽविद्धकर्णिका ॥
एकैषी त्रिशिरा देवी बृहत्तिक्ता वृकी रसा ।
बृहत्तिक्ता पापचेली मालती वृकदन्त्यपि ॥ **(Kdn)**

Synonyms of  patha are patha, stahilya, sthapani, vrddha, asmasuta, vara, ambhastha, ambhasthaka, yutha, pracina, aviddhakarnika, ekaishi, trisira, devi, brhattikta, vrki, rasa, papaceli, malati and vrkadanti.

विषघ्नी सर्वशूलघ्नि गुल्मघ्नी वातपित्तजित् ।
पाठा ज्वरप्रशमनी रक्तातीसारनाशनी  ॥ **(Mdn)**

Patha alleviates visha, sarva sula, gulma, vata, pitta, pacifes jvara, destroys rakta atisara.

पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्तिशूलज्वरच्छर्दिकुष्ठातीसारहृद्रुजः ॥
दाहकण्डुविषश्वासकृमिगुल्मगरव्रणान् । **(Bpn, Mpn)**

Patha is katu in rasa, tiksna, laghu in guna, usna in veerya, alleviates vata and slesma, cures sula, jvara, chardi, kustha, atisara, hrdruja, daha, kandu, visa, svasa, krmi, gulma, gara visha and vrana.

पाठा तिक्तरसा वृष्या विष्घ्नी कुष्ठकण्डुनुत् ।
छर्दिहृद्रोगज्वरजित् त्रिदोषशमनी परा ॥
पाठाऽतिसारशूलघ्नी कफपित्तज्वरापहा । **(Dhn)**

Patha is tikta in rasa, vrsya, alleviates kapha, pitta, visha, kustha, kandu, chardi, hrdroga, jvara, tridosha, atisara, sula and jvara.

पाठा तिक्ता गरुष्णा च वातपित्तज्वरापहा ।
भग्नसन्धानकृत्पित्तदाहातीसारशूलहृत् ॥ **(Rjn)**

Patha is tikta in rasa, guru in guna, usna in veerya, causes bhagna sandhana, alleviates vata, pitta, jvara, pacifies pitta, daha, atisara and sula.

पाठा तु कटुका तीक्ष्णा लघुरुष्णा त्रिदोषहा ।
हरेत् कुष्ठज्वरच्छर्दिदाहातीसारहृद्रुजः ॥
गुल्मकण्डूविषश्वासव्रणशूलगरकृमीन् ।

पाठाफलं पित्तहरं च शीतं
कषायमाधुर्ययुतं गुरु स्यात् ।

तस्यैव पत्रं त्वथ शीतविर्यं
रूक्षं गुरुग्राहि निहन्ति मेहम् ॥ **(Kdn)**

Patha is katu in rasa, tiksna, laghu in guna, usna in veerya, alleviates tridosha, cures kustha, jvara, chardi, daha, atisara, hrdruja, gulma, kandu, visa, svasa, vrana, sula, gara visha and krmi.

Patha phala is Kashaya, madhura in rasa, guru in guna, sita in veerya and alleviates pitta.

Its patra is ruksa, guru, grahi in guna, sita in veerya and cures meha.

पाठा तिक्ता कटूष्णा च भग्नसन्धानकारका ।
तीक्ष्णा लघ्वी पित्तदाहशूलातीसारनाशिनी ॥
वातपित्तज्वरच्छर्दिविषाजीर्णत्रिदोषकान् ।
हृद्रोगरक्तकुष्ठकण्डूश्वासकृमीन् जयेत् ॥
गुल्मोदरव्रणकफवातनाशकरी मता । **(Nir)**

Patha is tikta, katu in rasa, tiksna, laghu in guna, usna in veerya, causes bhagna sandhana, pacifies pitta, daha, sula, atisara, cures vata pitta jvara, chardi, visa, ajirna, tridosha, hrdroga, rakta vikara, kustha, ati kandu, svasa, krmi, gulma, udara, vrana, kapha and vata.